Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ महामृत्युञ्जयजपहोमं व्याख्यास्यामः । कृत्याद्रोहे आभिचारे दीर्घरोगे ग्रहपीडायां मृत्युप्राप्तौ महाव्याधौ महापदि चन्द्रग्रहणदोषे सूर्यग्रहणदोषे जन्मनक्षत्रे विषनाड्यां कुहूं व्रजेद्वाऽन्येषु महाभयेषु वा तेषां

परिहारार्थं मासि मासि जन्मनक्षत्रे प्राप्ते काले वा संवत्सरे संवत्सरे वा आचार्येण वा स्वयं वा आयुष्कामः (मेन) कर्तव्यः ॥

स्नात्वा पुण्याहं वाचयित्वा, प्राणानायम्य, नारायणशर्मण आयुष्कामार्थं महामृत्युञ्जयहोमं करिष्ये इति संकल्प्य अग्नेरुपसमाधानादि पात्रप्रयोगकाले दूर्वात्रिकं षट्त्रिंशदधिकशतत्रयं सह सादयेत्। गळूचीखण्डानि चतुरंगुल-प्रमाणानि ब्राह्मणदक्षिणतो दर्भेषु निधाय, व्रीहितण्डुलान्वा निर्वपति, मृत्यवे त्वा जुष्टं निर्वपामीति। तूष्णीमवहननं कृत्वा, प्रक्षाळ्योत्पूयाज्यं संस्कृत्य, चरुणा सह पर्यग्निकरणं कृत्वा, स्रुक्स्रुवमार्जनं कृत्वा, चरुमभिघार्य, उदगुद्वास्य प्रतिष्ठितमभिघार्य, परिधानप्रभृत्यग्निमुखान्तं कृत्वा पक्वात् जुहोति ॥

दर्व्यामुपस्तीर्य मध्यात् द्विरवदाय त्रिः पश्चार्धात्तिनोऽभिघार्य, अपैतु मृत्युरमृतं + शचीपतिः। इति पुरोनुवाक्यामनूच्य, परं मृत्यो अनु परेहि + मोतवीरान्। इति याज्यया जुहोति। पूर्ववदुपस्तीर्य, हरिं हरन्तमनु+विवधी-र्विक्रमस्व। इति पुरोनुवाक्यामनूच्य, मा छिदो मृत्यो मावधीः + विधेम। इति याज्यया जुहोति। आज्येन महाव्याहृतिभिश्च हुत्वा भूरग्नये इत्यादि पञ्चभिः पञ्चाहुतीर्हुत्वा, अथ दूर्वात्रिकं गळूचीखण्डानि पयसाऽक्त्वा जुहोति षट्त्रिंशदधिकशतत्रयम् ॥

प्रत्येकं अपैतु मृत्युरमृतं न आगन्+पतिः स्वाहा ॥ १ ॥ परं मृत्यो अनुपरेहि+वीरान् स्वाहा ॥ २ ॥ वातं प्राणं+जरामशीमहि स्वाहा ॥ ३ ॥ अमुत्र भूयादध यद्यम+शचीभिः स्वाहा ॥ ४ ॥ शल्कैरग्नि+म्यहं स्वाहा ॥ ५ ॥ हरिं हरन्तं+विक्रमस्व स्वाहा ॥ ६ ॥ माछिदो मृत्यो मा+विधेम स्वाहा ॥ ७ ॥ मा नो महान्तं + रीरिष स्वाहा ॥ ८ ॥ मानस्तोके+विधेम ते स्वाहा ॥ ९ ॥ प्रजापते न त्व+रयीणां स्वाहा ॥ १० ॥ यत इन्द्र भयामहे+जहि स्वाहा ॥ ११ ॥ स्वस्तिदा विशस्पतिः+अभयंकरः स्वाहा ॥ १२ ॥ त्र्यम्बकं यजामहे+मामृतात् स्वाहा ॥ १३ ॥

अपमृत्युं + संहस्रिणं स्वाहा ॥ १४ ॥ ये ते सहस्रं + यजामहे स्वाहा ॥ १५ ॥ जातवेदसे + दुरितात्यग्निः स्वाहा ॥ १६ ॥ भूर्भुवस्स्वः + पुष्टिं ददभ्यावृत्स्वः स्वाहा ॥ १७ ॥ मृत्युर्नश्यत्वायुर्वर्धतां भूः स्वाहा ॥ १८ ॥ मृत्युर्नश्यत्वायुर्वर्धतां भुवः स्वाहा ॥ १९ ॥ मृत्युर्नश्यत्वायुर्वर्धतां सुवः स्वाहा ॥ २० ॥ मृत्युर्नश्यत्वायुर्वर्धतां भूर्भुवस्सुवः स्वाहा ॥ २१ ॥

एतैरेकविंशतिमन्त्रैः षोडशपर्यायं प्रतिमन्त्रं हुनेत् । षट्त्रिंशदधिकशततयाहुतिर्भवति । अथाज्येन अष्टपर्यायमेकविंशतिमन्त्रैः प्रतिमन्त्रं जुहुयात् । अष्टाधिकषष्टिशताहुतिर्भवति । पुनरन्नेन षोडशपर्यायं एकविंशतिभिर्मन्त्रैः प्रतिमन्त्रं जुहुयात् । षट्त्रिंशदधिकशतत्रयाहुतिर्भवति । पुनराज्येन अष्टपर्यायमेकविंशतिभिर्मन्त्रैः प्रत्यृचं हुनेत् । अष्टाधिकषष्टिशताहुतिर्भवति । पुनराज्येन मृत्यवे स्वाहा इत्यष्टवारं हुनेत् । व्याहृतीभिर्हुत्वा ततः स्विष्टकृतमवदाय हव्यवाहमभिमातिषाह + हुवेम स्वाहा इति स्विष्टकृद्धोमं जुहोति । अनन्तरं परिध्यञ्जनं कृत्वा जयादिपरिषेचनान्तं कृत्वाग्रेणाग्निं दूर्वास्तम्भेषु हुतशेषं निदधाति । सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । तस्मै रुद्राय नमो अस्तु । इति द्वाभ्यां मन्त्राभ्यां निवेदयेत् । आयुर्दाअग्ने + रक्षतादिमं स्वाहा इति अग्नौ समिधमाधाय जातवेदा यदि वा पावकोसि + वृत्स्व ॥ इत्युपस्थाय हुतशेषे हविषि आज्यशेषं निनयेत् । अग्निरायुष्मान् इति पञ्चभिः पुनरेकविंशतिऋग्भिः चतुर्वारमभिमन्त्र्य आयुरसि वि + गेषं इति सर्वं चरुशेषं प्राश्य आचम्य जठरमभिमृशति यत इन्द्र + स्वस्तिदा विश + इत्येताभ्याम् । गुरवे वरं दत्वा, दशदानं कृत्वा, अवेक्षा(अवेक्षिता)ज्यं दत्वा, ऋत्विग्भ्यो दक्षिणां दत्वा, ब्राह्मणान् भोजयेदपूपैर्घृतपायसैः । एवं कृतवानायुष्मान् भवतीति ॥

अयुतहोमात् दीर्घायुर्भवति । लक्षहोमात्सहस्रायुर्भवति सहस्रायुर्भवति ॥

अथ यक्षिणीमन्त्रा लिख्यन्ते —